Durga Suktam

दुर्गासूक्तम्

MANTRA · मन्त्र

1 जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः।
स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं
दुरितात्यग्निः॥ १॥

2 तामग्निवर्णां तपसा ज्वलन्तीं वैरोचनीं कर्मफलेषु
जुष्टाम्।
दुर्गां देवीꣳ शरणमहं प्रपद्ये सुतरसि तरसे नमः॥
२॥

3 अग्ने त्वं पारया नव्यो अस्मान् स्वस्तिभिरति
दुर्गाणि विश्वा
पूश्च पृथ्वी बहुला न उर्वी भवा तोकाय तनयाय
शंयोः॥ ३॥

4 विश्वानि नो दुर्गहा जातवेदः सिन्धुं न नावा
दुरितातिपर्षि।
अग्ने अत्रिवन्मनसा गृणानोऽस्माकं बोध्यविता
तनूनाम्॥ ४॥

5 पृतनाजितꣳ सहमानमुग्रमग्निꣳ हुवेम
परमात्सधस्थात्।
स नः पर्षदति दुर्गाणि विश्वा क्षामद्देवो अति
दुरितात्यग्निः॥ ५॥

6 प्रत्नोषि कमीड्यो अध्वरेषु सनाच्च होता नव्यंश्च
सत्सि।
स्वां चाग्ने तनुवं पिप्रयस्वास्मभ्यं च
सौभगमायजस्व॥ ६॥

7 गोभिर्जुष्टमयुजो निषिक्तं तवेन्द्र विष्णोरनुसंचरेम।
नाकस्य पृष्ठमभि संवसानो वैष्णवीं लोक इह
मादयन्ताम्॥ ७॥

Text checked against: Swami Vimalananda (ed., tr.), Mahanarayanopanisad, Sanskrit text with Sayana-based commentary and English translation, Sri Ramakrishna Math, Madras, 1986. Meanings, audio and all scripts at nityapaath.com/durga-suktam/